শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীরামচন্দ্র ৱিরচিতং

# ॥ শ্রী নৃসিংহপঞ্চামৃতস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নৃসিংহপঞ্চামৃতস্তোত্রম্ ॥

অহোবিলং নারসিংহং গৎৱা রামঃ প্রতাপৱান্।
নমস্কৃৎৱা শ্রীনৃসিংহং অস্তৌষীৎ কমলাপতিম্॥ **1** ॥

গোৱিন্দ কেশৱ জনার্দন ৱাসুদেৱ
ৱিশ্বেশ ৱিশ্ব মধুসূদন ৱিশ্বরূপ।
শ্রীপদ্মনাভ পুরুষোত্তম পুষ্করাক্ষ
নারাযণাচ্যুত নৃসিংহ নমো নমস্তে॥ **2** ॥

দেৱাঃ সমস্তাঃ খলু যোগিমুখ্যাঃ
গন্ধর্ৱ ৱিদ্যাধর কিন্নরাশ্চ।
যৎপাদমূলং সততং নমন্তি
তং নারসিংহং শরণং গতোঽস্মি॥ **3** ॥

ৱেদান্ সমস্তান্ খলু শাস্ত্রগর্ভান্
ৱিদ্যাবলে কীর্তিমতীং চ লক্ষ্মীম্।
যস্য প্রসাদাৎ সততং লভন্তে
তং নারসিংহং শরণং গতোঽস্মি॥ **4** ॥

ব্রহ্মা শিৱস্ত্বং পুরুষোত্তমশ্চ
নারাযণোঽসৌ মরুতাং পতিশ্চ।
চন্দ্রার্ক ৱায্ৱগ্নি মরুদ্গণাশ্চ
ৎৱমেৱ তং ৎৱাং সততং নতোঽস্মি॥ **5** ॥

স্বপ্নেঽপি নিত্যং জগতাং ত্রযাণাং
    স্রষ্টা চ হন্তা ৱিভুরপ্রমেযঃ।
ত্রাতা ৎৱমেকস্ত্রিৱিধো ৱিভিন্নঃ
    তং ৎৱাং নৃসিংহং সততং নতোঽস্মি॥ **6**॥

ইতি স্তুৎৱা রঘুশ্রেষ্ঠঃ পূজযামাস তং ৱিভুম্।
পুষ্পৱৃষ্টিঃ পপাতাশু তস্য দেৱস্য মূর্ধনি॥
সাধু সাধ্ৱিতি তং প্রোচুঃ দেৱা ঋষিগণৈস্সহ॥ **7**॥

দেৱা ঊচুঃ
রাঘৱেণ কৃতং স্তোত্রং পঞ্চামৃতমনুত্তমম্।
পঠন্তি যে দ্ৱিজৱরাঃ তেষাং স্ৱর্গস্তু শাশ্ৱতঃ॥ **8**॥

॥ শ্রী নৃসিংহপঞ্চামৃতস্তোত্রং সমাপ্তম্॥